International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 01-04
© 2020 IJSR
www.anantaajournal.com
Received: 01-05-2020
Accepted: 02-06-2020

डॉ० राजेन्द
संस्कृत–विभाग, जी० एम० एन० कॉलेज, अम्बाला छावनी, भारत।

एम०एच०आर०डी० द्वारा प्रदत्त अनुदानेन आई०सी०एस०एस०आर (इमप्रेसयोजनाधीन) प्रकाशितं शोधपत्र

Corresponding Author:
डॉ० राजेन्द
संस्कृत–विभाग, जी० एम० एन० कॉलेज, अम्बाला छावनी, भारत।

# वेदेषु पशुपालनम्

राजेन्द

**प्रस्तावना**
धर्मार्थकाममोक्षात्मके पुरूषार्थचतुष्टयेऽर्थस्य महत्त्वपूर्णं स्थानम्। नह्यार्थेन विना शरीरधारणमपि शक्यं, पुनरन्यव्यवहाराणां तु का कथा ? अर्थेनैव धर्मो रक्ष्यते, इतरपुरूषार्धानाम् च सिद्धिः। अर्थ्यते आकाङ्क्ष्यतेऽर्थिभिस्तदर्थो नाम। प्रकृतिप्रदत्तानां वस्तूनामुपयोगिताप्रवर्धन– मेवार्थस्योत्पत्तिः। अर्थोत्पत्तिः प्रकारश्चार्थशास्त्रस्य ग्रन्थेषु निरूपितं वेदेषु यापि तस्य बीजानि समुपलभ्यन्ते । भूमिः, श्रमः साधनसाम्रगी (पूंजी), व्यवस्था, साहसञ्चेति पंचोपकरणणान्यर्थस्योत्पत्तेः । कृषिकर्मम् भूमिं बिना न सम्पाद्यते, नैव च पशुं विना। अतः यथा कृषिकर्माजनस्योपकरणं तथैव पशुपालनमपि वित्तसाधकम कृषिः कथं करणीयेत्याह श्रुतिः–

**संकेत शब्दाः ऋग्वेद, यजुर्ववेद, सामवेद, अथर्ववेद, कौटिल्य अर्थशास्त्रम्, अश्वशाला, शतपथ ब्राहमण, गोपालः, बलीवर्दः, हस्ति ।**

अद्यत्वे अपि भारतखण्डे त्रिविष्टपे चान्येषु देशेष्वपि बहवो नराः पशुपालनेन स्वाजीविकां साधयक्ति पशुनोऽस्मभ्यं भूरि भोजनं द्रविणंच प्रयच्छन्ति । ते द्विविधाः आरण्या ग्राम्याश्च[1]। अरण्ये भवा आरण्याः सिंहगजवृकर्क्षवराहादयः च। ग्राम्येषु गोमहिषाजादयो विशेषतो दुग्धघृतेनानेन मनुष्यान् तर्पयन्त्यवयश्चोर्णाभिः, रासभाः भारवहनेन तुरगाश्च रथवाहनेन पुरूषं कृतकृत्यं कुर्वन्ति। एते सद्यः प्रजायमानत्वात् सद्योवृद्धित्वात् विक्रयमाणां मुद्राप्राप्तिसाधका अपि। पशुवत्सु निकेतेष्वेव प्रजा लक्ष्मीःश्रीश्च विराजन्ते । ऐतेषां पशूनां वर्णनमसकृदुपलभ्यते वेदेषु। आरण्येषु मृगेषु मृगराजः सम्राडिव, ग्राम्येषु चाघ्न्याश्वौ श्रेष्ठत्वेनाम्नातौ। वृषभाः कृषिकर्मणेः क्षेत्रकर्षणाय रथवाहनाय च, गावः आरोग्याय बलवर्णपृष्टयै प्रजान्नहेतोश्च पालनीयाः पोषणीयाः रक्षणीया वर्धनीयाश्च। आम्नायेषु सर्वप्राणिनां हिंसानिषेद्यः क्रियते[2]। तत्र चोच्यते अस्मामकगोष्ठं पशुभिः समृद्धं तेभ्यः सुखावहश्च स्यात्[3]। पशूनां समृद्धया पुष्टयैव मनुष्यामपि समृद्धि पुष्टिः वा भवति । पशवः कथं पालनीया इति अत्र श्रुतिरूपदिशति –

ये वाजिनः सुशिक्षिताः सुदमना उत्तमाभरवनतः पुष्टाः सन्ति, ते एव कार्याणि समरेषु विजयंय साध्नुवन्ति[4] ''यद्वाजिनोदाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य यद्वा घास्य प्रभृतमास्येतृणंसर्वाताते अपि देवेष्वस्तु ।''

ततो वाजिनः पुष्टयै छागदुग्धं पाययितव्यम् –''एषः छा़गः पुरोअश्वेन वाजिना पूष्णो भागो नीयते विश्वदेवयः'' [5]

**सुसंस्कृतानि अन्नानि चणकाश्च भोजयतिव्याः ।**

ते अश्वा मक्षिका दंशेभ्यो गोपायितव्याः स्वहस्तेन रश्मिभिः सुनियम्य यथेष्टङ्गमयितव्याः[6]– ''यदश्वस्य कविशों मक्षिकाश यद्वा स्वरौस्वधितौ रिप्तमस्ति''।

विविधनिष्क्रमणनिषदनगतिभिः सुशिक्षणीयाः[7] निक्रमणं निषदनं यच्च षडवीशमर्वतः। भेषजप्रदानेन च नीरोगः कारणीयाः[8]– 'भेषजमसि भेषजं गवेऽश्वाय पुरूषाय भेषजम् । सुखं मेषाय मेष्यैं' ।

तेषां नखपादयोः रोमेषु च भवं मलं समीक्ष्यापाकरणीयम्[9]– 'यद्धस्तयोः शमितुर्यन्नरवेषु सर्वा ता ते अपि देवेष्वस्तु ।' अश्वशालायाः अध्यक्षस्य विषयः कौटिल्यः कथयति यत् सः अश्वानाम् वर्णनं पुस्तके लिखेत्[10]' अश्वाध्यक्षः पण्यागारिकं कयोपागतमाहवलब्धमाजातं साहाय्यागतं पणस्थितं यावत्कालिकं वाश्वापर्यग्नं कुलवयोवर्णचिहं कर्मवर्गागमैर्लिखयेत् ।

**अप्रशस्तान् अश्वान् त्यजेत् किंवा तान् नीरोगः कारयेत्[11]**
**'अपशस्तन्यङ्गव्याथिताश्चावेदयेत्'' ।**
**कोष्ठात् धनमगाहृत्य सः तान् पालयेत्[12]**

'कोशकोष्ठागाराभ्यां च गृहीत्वा मासलांभमश्ववाहः चिन्तयेत्। कीदृशी भवेत् अश्वशाला, इत्यत्र कौटिल्यः आदिशति यत् अश्वशाला सुपरिणामा, प्रद्वाशसनफलकयुक्ता, वानरमयूर पृषतनकुलचकोरशुकशरिकाभिराकीर्णा भवेत्[13] 'अश्वविभवेनायतामश्वायामद्विःगुणविस्तारा चतुर्द्वारोपावर्तनमध्यां सप्रगीवां प्रद्वारासनफलकयुक्तां वानरमयूर पृषतनकुल चकोर शुकशारिकाभिराकीर्णांशालां निवेशयेत्'।

अश्वानाम् भोजनस्य स्थानं सुष्ठुः भवेत् तेषां कृते मूत्रपुरीषोत्यर्गस्य व्यवस्था सुष्ठुरूपेण करणीया[14] 'अश्वायामचतुरश्रश्लक्ष्णफलकास्तारं सखादनकोष्ठकं समूत्रपुरीषोत्सर्गमेकैकशः प्राङ्मुखमुदङ्मुखं वा स्थानं निवेशयेत्। शालावशेन वाग्विभागं कल्पयेत्। बडवावृषकिशोराणाम् एकान्तेषु'।

बडवायाः विषयेऽपि कौटिल्यः नियमान् निर्धारियति। प्रजातयै बडवायै कीदृशं भोजनं देयम्—तस्यै त्रिरात्रं धृतस्थपानम् देयम् । अत ऊर्ध्व सक्तु प्रस्थः स्नेहभेषज्यप्रतिपानं दशरात्रं, ततः पुलाको यवसमार्तवश्चहारः देयः[15] 'बडवायाः प्रजातायास्त्रिरात्रं घृतप्रस्थापनम्। अतः ऊर्ध्व सक्तुप्रस्थः स्नेहभैषज्यप्रतिपानं दशरात्रं, ततः पुलाको यवसमार्तवश्चहारः'।

नवजातअश्वशिशवे कीदृशं भोजनं देयम्—दशरात्रादूर्ध्व तस्मै घृतचतुर्भागः सक्तुकुडवः क्षीरप्रस्थाहारः देयः आषण्मासादिति । ततः परं मासोत्तरमर्धवृद्धिर्यवप्रस्थ आत्रिवर्षाद्, द्रोणआ चतुवर्षादिति । अतः ऊर्ध्व चतुर्वर्षः पच्चवर्षी वा कर्मण्यः पूर्ण प्रमाणः[16]।

अश्वानाम् उत्तमः मध्यमः अवर त्रिविभागाः कृताः कोटिल्येन[17] तत्र उत्तमाश्वस्यलक्षणं अस्ति 'द्वात्रिंशादङ्गुलं मुखमुत्तमाश्वस्य, पंचमुखान्यायामः विशंत्यङ्गुला जङ्घा, चतुर्जङ्घः उत्सेधः ।' तत्र मध्यमः अस्ति 'त्रयङ्गुलावरं मध्यमावरयोः । शताङ्गुलः परिणाहः । पंचभागावरं मध्यमावरयोः'

उत्तमाय अश्वाय कीदृशं भोजनं देयम् ? तेषां विधायोगे कौटिल्यः कथयति 'उत्तमाश्वस्य द्विद्रोणं शालिव्रीहियवप्रियङ्गुणामर्धशुष्कमर्धसिद्धं वा मुद्गमाषाणां वा पुलाकः। स्नेहप्रस्थंस्थ। पंचपलं लवणस्य। मासं पंचाशत्पलिकम्। रसस्याढकं द्विगुण दध्न। पिण्डक्लेदनार्थम्। क्षारपंचपलिकः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रतिपानम्। दीर्घपथभारक्लान्तानां च खादनार्थ स्नेहप्रस्थोऽनुवासनम्। कुडुवो नस्यकर्मणः। यवसस्यार्धभारः तृणस्य द्विगुणः षडरत्निपरिक्षेपः पुंजीलग्रहो वा'।

**अपि च मध्यमावराभ्याम् कीदृशं भोजनं देयम्**
**पादावरमेतन्मध्यमावरयाः । उत्तमसमो रथ्यो वृषंच मध्यमः । मध्यमसमश्चावरः ।**
**पादहीनं वडवानां पारशमानां च । अतोऽर्ध किशोराणां च । इति विधायोगः[18] ।**
**विद्यापाचकेभ्यः सूत्रग्राहकेभ्यः चिकित्सकेभ्यः च तेषां भोजनस्य कश्चित् अंश देय[19] ।**

ये अश्व अशक्ताः तेभ्यः केवलं जीवनार्थ भोजनं देयम् [20] कुत्र—कुत्र उत्तमाः अश्वा सन्ति—तत्रापि कौटिल्यः कथयति—काबुल (काम्बोज) सैन्धवाः (सिन्ध) आरट्टजवानायुजाः देशानाम् अश्वा उत्तमाः, व्यासन्सतलुजमध्यवर्ती देशानामश्वाः राजस्थानस्य च अश्वा मध्यमाः अन्ये सर्वाः अधमाः[21]

'प्रयोगग्यानामुत्तमाः काम्बोजकसैन्धवारभट्ट जवानायुजाः। मध्यमाः बाह्लकीपापेयकसौवीरकतैतलाः। शेषाः प्रत्यवराः'।

अश्वानां गतिरपि पंचविधा [22]। 1. वल्गनम् 2. नीचैर्गतम् 3. लंघनम् 4. धोरणम् 5. नारोष्ट्रम् । तत्र वल्गनस्य अपि षड्भेदाः [23]. — 1 औपवेणुक 2. वर्धमानक 3 यमक 4 आलीढप्लुत 5. पूर्वग 6. त्रिकचाली

नीचैर्गतस्य अपि षोडशभेदाः [24] प्रकीर्णकः प्रकीर्णोत्तरो, निषण्ण, पार्श्वानुवृत, ऊर्मिमार्ग, शरभक्रीडित शरभप्लुत, त्रिताल, वाह्वानुवृत, पंचपाणि, सिंहायत, स्वाधूत, विलष्ट, श्लिंगित, बृंहित, पुष्पाभिकीर्ण।

लंघनस्य अपि सप्तप्रकाराः सन्तिः [25] 1. कपिप्लुत 2. भेकप्लुत 3. एणप्लुत 4. एकपादप्लुत 5. कोकिलसंचारी 6. उरस्य 7. बकचारी।

धोरणस्य अष्टभेदाः सन्तिः [26] 1. कांक 2. वारिकांक्ष 3 मायूर 4 अर्धमायूर 5. नाकुल 6. अर्धनाकुल 7. वराह 8. अर्धवराह।

सर्वेषां अश्वानां गतिर्नाम धारा— धारायाः अभिप्रायः अस्ति क्रमः [27] तत्र तेषां सज्जीकरणार्थ अपि नियमाः सन्ति 'तेषां बन्धनोपकरणं योग्याचार्याः प्रतिदिशेयुः। साङ्ग्रामिकंरथाश्वालंकारं च सूताः। अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारमृतु विभंक्त चाहारम् [28] ।

यथा वाजी पशुषुश्रेष्ठत्वेनाम्नातस्तथा धेनुरपि। अस्मिंलोके न किञ्चिद्धनं गोधनाच्छ्रेय—स्तरम्। रक्षिताः पोषिता इमा गावो बलवर्णबुद्धिपुष्ट्युत्साहारोग्य प्रदाता [29] दिव्यममृतमयं हैयङ्गवीनं पयश्च प्रयच्छन्ति । स्वयं प्रज्ञावत्यः पुरूषमपि प्रज्ञावन्तं कुर्वन्ति [30]। स्वयं प्रज्ञावत्यः पुरूषमपि प्रज्ञावन्तं कुर्वन्ति। सर्वाणि शास्त्राणि साङ्गोपाङ्गश्च वेदा गोमहिमानं गायन्ति। एतद्वै विश्वरूपं यावदपितत्त्सर्वं गोरूममेव[32]। अतः सर्वै स्वगृहे एकं बृहद् गोष्ठं रचनीयम्।[33]

यत्र गावः सुखेन वसन्तु, आहारमदन्तु, अभीता उच्छ्वसन्तु [34]। यस्य पशवो मेदन्ते तस्य गृहसदस्याः अपि मेदन्ते। यस्य च पशवो वपुषा क्षीयन्ते स नरोऽपि क्षीयते। यत इमा गावो नीरसानि तृणानि जग्ध्वा मिष्टं जीवनीयं पयः ददति तत एताः सर्वत्र पूज्याः पोषणीयाश्च। यत्र धेनवो वसन्ति ततो दुखानि दुर्मतिः अलक्ष्मीश्चपाव्रजन्ति[35]। अतः एताः स्तेनेभ्योऽघशंसेभ्यो वधिसकेभ्यश्च गोपनीयाः[36]। ताविमौ धेन्वनुडुहाविदं सर्वं बिभृतः[37]।

गोपालनविषये कौटिल्यः विस्तृतरूपे विचारयति। तस्य मते गोऽध्यक्षस्य कर्त्तव्यमस्ति यत् गोसम्बन्धीसमस्त अधिकारिणाम् सम्बन्धे सः सजगः भवेत्[38]—'गोऽध्यक्षो वेतनोपग्राहिंक कर प्रतिकरं भग्नोत्सृष्टकं भागानुप्रविष्टकं व्रजपर्यग्रं नष्टं विनष्टं क्षीर —घृत संजातं चोपलभेत्'[39]।

गोपालकः पिण्डराका, दोहकः गंदकः लुब्धकः ते पंच—पंच मिलित्वा शतं धेनूनां पालयेयुः। वेतनरूपे तेषां कृते रूप्यकाणि, अन्नवस्त्राणि वा भवेयुः। न तत्र स्यात् दुग्ध—दधिः इत्यादि यतः दुग्धदध्यार्थ ते वत्सान् घ्नन्तिा। गवां अयं रक्षोपायः 'वेतनोपग्राहिकः' इति कथ्यते[40]।

जरद्गधेनु, गर्भिणी, पण्द्रौही वत्सतरीश्इत्यादि च. प्रकारानाम् धेनवः विंशत्यात्मन् समूहे कृत्वा एकः एकः सेवकः पालयेत्। अयं गवं रक्षोपायः 'करप्रतिकरः' इतिकथ्यते[41]।

व्याधिग्रस्ताः दुर्दोहाः शतं शतं समूहे कृत्वा एकः—एकः सेवक पालयते। अयमोपायः अस्ति 'भग्नोसृष्टकम्' नामोपायः [42]।

यः शत्रुभयात् राज्ञः निरीक्षणे स्वगाःपालयति, तस्यकृते नियमः अस्ति यत् स स्वआयस्य दशमं भागं राज्ञे दधात् । अयं उपायो अस्ति 'भागानुप्रविष्टकम'[43]।

कौटिल्यमते षड्विधाः बलीवर्दाः सन्ति—वस्ता, वत्सतरा, दग्या, वहिनो, वृषा उक्षाणंच पुंगवा[44]। महिषाः चतुर्विधाः सन्ति—युगवाहनशकटवहा वृषभाः सूनामहिषाः पृष्ठस्कन्धवाहिनश्चमहिषाः[45]। नष्टस्य गोधनस्य त्रयप्रकाराः सन्ति—चोरह्तमन्ययूथ प्रविष्टमवलीनं वा नष्टम्[46] यदि कोऽपि गोपः गां हन्ति, तर्हि सः प्राणदण्डस्याधिकारी भवति[47]।

'स्वयं हन्ता घातयिता हर्ता हारयिता च वध्यः। परशूनां राजाकेंन परिवर्तयिता रूपस्य पूर्व साहसदण्डं दद्यात्।'

गोपालकानां कर्त्तव्यमस्ति बालवृद्धव्याधितानां परिचर्या[48]

बालवृद्धव्याधितानां गोपालकाः प्रतिकुर्यः। लुब्धकश्वगणिभिरपास्तस्तेनव्यालपरबाधभयमृतु विभक्तमरण्यं चारयेयुः।सर्पव्यालत्रासनार्थंगोचरानुपात्ज्ञानार्थं च त्रस्नूनां घण्टातूर्य च बध्नीयुः'। मृतपशूनां उपयोगः कथं करणीयः इत्यत्र कौटिल्यः कथयति—कारणमृतस्यांकचर्मगोमहिषस्य कर्णलक्षणमाजाविकानांपुच्छमंकचर्मचाश्वखरोष्ट्राणांबाणांबाल—वर्मबस्तिपित्त स्यामुदन्तखुरश्रङ्गस्थीनिचाहरेयुः।मांसमाममार्द शुष्कं वा विक्रीणीयुः। उदश्चितश्वराहेभ्यों दद्युः।कूर्चिका सेनाभक्तार्थमाहरेयुः। किलाटो

घाणपिण्यांकवलेवार्थः।[49] श्रावणभाद्रआश्विन कार्तिकमार्गशीर्षमासेषु द्विकालेगाः द्रुहेत्। माघ फाल्गुनचैत्र वैशाख ज्येष्ठाषाढमासेषुकेवलंसायंकाले एवदुहेत्। यः कोऽपि ऐषुमासेषु द्विकालं स दण्डास्पदः अस्ति[50]। अनेनएवप्रकारेण यः उचितसमयेबलीवर्दान् न परिचरेत्, सः एवंवेतनस्याधिकारी न अस्ति।[51] गवां एकद्रोणे क्षीरे एकः प्रस्थः घृतः भवति, महिषीनाम् एकद्रोणेक्षीरे पंचप्रस्थाः घृतः भवति। अजातीनाम् क्षीरे द्विभागोऽधिको (2/5) घृतः भवति मन्थनं एवं उत्तमं प्रमाणमस्तितत्र। यत्र सुष्ठुर्भूमिः, तृणोदकानि तत्रैव क्षीरघृवृद्धिर्भवति। अपि व अजावीनां षाण्मासिककीमूर्णांग्राहयेत्।[52]

बलाविर्दानांभोजनस्य विषयेकौटिल्यस्य निर्धारणंवर्तते—यत् श्रेष्ठ—बलीवर्देभ्यः अर्धभारः यवाः दातव्याः, तृणानांतद्विगुणं, घाणपिण्याकास्य तुलाकणकुण्डकस्य दशाढकं, मुखलवणस्य पंचपलिकं, पानस्य एकः प्रस्थः देयाः[53]।

अन्येषांपशूनांकृते तत्र व्यवस्थाअस्ति यत् बलीवर्दानांभोजनस्य पादोनम् अंशम् अश्वतरगोखरेभ्यः, महिषोष्ट्रेभ्यः द्विगुणम्। सर्वेभ्यः पशुभ्यः तेषां इच्छानुसारेण तृणोदकं देयम्[54]।

वेदेषु कथितम् यत् यथाश्वादयः पशवः पालनीयास्तथा पक्षिणोऽपि। वसन्तर्तौ कपिञ्जलाः, ग्रीष्मर्तौ कलविंका, वर्षर्तौवित्तिर्यः शरदिवर्तिकाः, हेमन्तर्तौककराः, शिशिरर्तौ च विककराः पालनीयाः।[55] एते पक्षिणः ऋतुसुखप्रदाः पुष्टिकरा, विषहराश्चभवन्ति एवंपशुपतिराम्नायेषुप्रशस्यते[56]।

हस्तिनाम् विषयेकौटिल्यः कथयति यत् गजशालायाः अध्यक्षः अतिनिपुणः भवेत्। स तेषांअरण्यानि रक्षेत्। तेषांचिकित्सकान् चानुतिष्ठेत्[57] ''हस्त्यक्षोहस्तिवनरक्षांदम्यकर्म क्षान्तानांहस्तिहस्तिनीकलभानां शालास्थान शय्ययाकर्मविधायवसप्रमाणंकर्मस्वायोगंबन्धनोपकरणंसाऽग्रामिकम् अलङ्कारं चिकित्सकानीकस्थोपस्थायुकवर्गंचानुतिष्टेत्।''

### तत्रगजशालायाःवर्णनमस्ति—

'हस्त्यायायमद्विगुणोत्सेधविष्कम्भायामांहस्तिनीस्थानाधिकांसप्रग्रीवांकुमारीसऽग्रहांप्राङ्मुखीमुदङ्मुखी वा शालांनिवेशयेत्।[58]

गजानां दैनिकक्रियायाः विषयेकौटिल्यः लिखति यत प्रथमसप्तमावष्टमभागावहः स्नानकालौ तदनन्तरंव्यायामकालः, पश्चात्प्रतिपानकालः। रात्रिभागौ द्वौस्वपनकालौ, त्रिभागः संवेशनोत्थानिकः।[59]

ग्रीष्मर्तुः एव गजानांग्रहणकालः। 'ग्रीष्मेग्रहणकालः। विशांतिवर्षौग्राह्या[60] तत्र पुनः कीदृशः गजः सर्वोत्तमः—सप्तारत्निरूत्सेधोनवायामोंदशपरिणाहः। प्रमाणतःचत्वारिंशद्वर्षोभवत्युत्तमः। त्रिंशद्वर्षो मध्यमः। पंचविशांतिवर्षोऽवरः[61]।

तेषांभोजनाविषयेनियमः अस्ति—''तयापादावरो'' विधाविधिः उत्तमाय गजाय द्रोणः तण्डुलानिदेयाः अर्धाढकं तैलंदेयम्, सर्पिषस्त्रयः प्रस्थाः, लवणस्य दशपलंदेयम् इत्यादिनः मासंपंचशात्पलिकम्, रसस्याढकं द्विगुण वा दध्नः पिण्डक्लेदनार्थम्। क्षारंदशपलिकम् मद्यस्य आढकं द्विगुणं वा पयसः प्रतिपानम् मात्रावसेकस्तैलप्रस्थः शिरसोऽष्टभागः प्रादीपिकश्चव्यवसस्य द्वौभारौसपादौ शष्पस्य शुष्कस्यार्धतृतीयोभारः। कडङ्गरस्यानियमः[62]।

कार्यभेदेनहस्तिनाम् चतस्त्रः श्रेण्यः भवन्ति—दम्य, सान्नाह्य, औपवाह्य, व्यालश्च[63] दम्यस्य पंचप्रकाराः सन्ति—स्कन्धगतः, स्तम्भगतो, वारिगतोऽवपातगतो यूथगतश्चेति[64] सन्नाहाः सप्तक्रियापथः उपस्थानं, संवर्तनं, संयानं, वधावधो, हस्तियुद्धं, नागरायणं, साङग्रामिकं च[65]। औपवाहोऽष्टविधः—आचरणं कुंजरौपवाहाः धोरणः, आधानगतिकः, यष्ट्युपवाह्याः, तोत्रोपवाह्याः शुद्धोपवाह्याः, मार्गायुकश्चेति[66]। व्यालस्य चत्वारः भेदाः सन्ति—शुद्धः सुव्रतः, विषमः, सर्वदोषप्रदुष्टः[67]

तेषांउपचारस्य क्रियाअपिकौटिल्येनकृतादम्योपचारोविक्कम[68], सन्नाह्योपचारों कक्ष्या कर्मग्रैवेयकर्म यूथकर्म च। औपबाह्योपचारः शरदकर्महीनकर्मनारोष्ट्रकर्म च[69]। यदिको अपिकर्मचारीस्वकार्ये त्रुटिः करोति, तदातस्मै वेतनं न दातव्यम्[70] — 'स्थानस्याशुद्धिर्यवसस्यासग्रहणंस्थले शायनमभागे घातः परारोहणकाले यानमभूमावर्तीर्थेऽवतारणं तरूषण्ड इतिप्रस्थानानि। तमेषांभक्तवेतनादादीत।

**मानसदृशः हस्तिनाम् कुशलक्षेमाय नीराजनकार्यकुर्वेत्**
**''तिस्रो नीराजनाः कार्याश्चातुर्मास्यृतुसन्धिषु।**
**भूतानां कृष्णसन्धीज्थाः सेनान्यः शुक्लसन्धिषु[71]।**
**हस्तिदन्ताः अति मूल्यवन्ताः तस्य विषयेकौटिलस्य विचारः अस्ति।**
**''दन्तमूलपरीणाहद्विगुणंप्रोज्झय कल्पयेत्।**
**अब्दे द्वयर्धेनदीजानांपंचाब्देपर्वतौकसाम्[72]।**

परं या व्यवस्थाकृताअस्माकं शास्त्रकारैः, तस्याः समूलोच्छेदनं एव दृश्यतेसम्प्रति। पशूनांकृते न तु अस्माकं सर्वकारः, न च वयं एव सजगाः। प्रतिदिनंसर्वत्र स्वास्थ्यहानिः दृश्यते, तस्य मुख्यकारणम् पशूनां अल्पाहारित्वं, तेषां शक्तिसामर्थ्यादधिकं च कार्यः। पशुपालकाः एतादृशाः निर्धनाः यत्, तेतुस्वपालनंकर्त्तुमपि न समर्थाः किम् पुनः पशूनाम्। अधुना न कोऽपिनन्दः वर्तते, न च कोऽपिकृष्णः वर्तते। अपितुकंसरूपेअनेकाः गोहन्तारः सन्ति। येके च धनवन्ताः पशुपालकाः, तेअतिभ्रष्टाचरणयुताः। तेतुस्वार्थिकोन्नतेः हेतोः दुग्धमध्ये जलस्य मिश्रणं कुर्वन्ति, सूचिकामाध्यमेन बलात् गाः दुहन्ति। कैंसरइति भीषणव्याधेः एकं मुख्यं कारणमस्ति—मिश्रणदुग्धम्। यदा—कदा दुग्धमध्ये कस्यापि तैलस्य मिश्रणं भवति, वसायाः मिश्रणं वर्तते—तत् एव सम्मिश्रितं दुग्धम् ";लदजीमजपब डपसाद्ध। सर्वकारः यदा निरीक्षणं करोति, तदा जनः अधिकारिणः हस्ते किमपि स्थाप्य (उत्कोचं दत्त्वा) दण्डात् मुक्तः भवति। किमधिकम् वक्तुंशक्यते, सर्वे एव अत्र साक्षिणः बिहारप्रदेशस्य मुख्यमन्त्रिणः लालूप्रसादस्य 'चाराघोटाला घोरकाण्डस्य।'शास्त्रं' निर्मित्वा शास्त्रकाराः तुगताः, परंअयमेवतेषांसम्मानः, अयं एव तेषांआदरः किम्? वयंसर्वेसहृदयाः सचेतनाः, संस्कृतज्ञाः तथाकुर्वेम, यथाइदंअनुचितं न भवेयुः।

### संदर्भ


1. यजुर्वेदः – 31/6
2. यजुर्वेदः – 13/47, 48 – इमं मा हिसीर्दिपादं पशुम्।
3. अथर्ववेदः – 2/26/2, 2/26/3 – इमं गोष्ठं पशवः सं स्रवन्तु बृहस्पतिरानयतु प्रजानन्।
4. ऋग्वेद – 1/62/9
5. ऋग्वेद – 1/162/3
6. कृ – 1/162/9
7. कृ 1/162/14,
8. यजु–3/59
9. कृ – 1/162/9
10. कौटिल्य अर्थशास्त्रम् – प्रकरण 46 अध्याय 30, अश्वाध्यक्षः, पृ0 274ᕍ
11. 11 वही, पृ0 274
12. वही, पृ0 274
13. वही, पृ0 275
14. वही, पृ0 275
15. वही, पृ0 275
16. वही, पृ0 276
17. वही, पृ0 276
18. वही, पृ0 277
19. कौटिल्य अर्थशास्त्रम् विधापाचकसूत्रग्राहकचिकित्सकाः प्रतिस्वादभाजः
20. वही, पृ0 277 युद्धव्याधिजराकर्मक्षीणाः पिण्डगोचरिकाः स्युः। असमरप्रयोज्याः पौरजानपदानामर्थेन वृषा बडबास्वायोज्याः।
21. वही, पृ0 278
22. वही, पृ0 278
23. वही, पृ0 278

24. वही, पृ0 278
25. वही, पृ0 278
26. वही, पृ0 279
27. वही, पृ0 279–80 विक्रमोवल्गितमुपकण्डमुपजवो जवश्चधाराः
28. वही पृ0 281
29. अथर्ववेद 2/2614 संसिञ्चामि गवां क्षीरं समाज्येन बलं रसम्। 2/26/5 आ हरामि गवां क्षीरं आहषि धान्यं रसम्।
30. ऋ 8/10/16 – व चोविदं वाचमुदीरयन्तीं विश्राभिर्धीभ रूपतिष्ठगानाम्।
31. अर्थवत्र 9/7/25
32. अथर्व 19/58/4 'व्रजं कृणुध्वम्।
33. अथर्व 3/14/15 – शिवो वो गोष्ठो भवतु शारिशाकेन पुष्यत इहैगेत प्रजायहवग्।
रू/1416– अयं वो गोष्ठ इह पोषयिष्णुः। रायस्पोषेण बहुला शवन्ती–र्जीवा जीन्तीरूप वः सदेम।
34. अर्थव 4/21/6 :यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम् । भद गुहं भदवाचो।
35. कृत्र 10/42/10 – 'गोभिष्टरेमामतिं दुरेवाम्।
36. अथर्व 4/22/7 – 'प्रजावतीः सूयसे रूपशन्तीः शुद्वा अपः सुप्रणाणे पिबन्तीः । मा व स्तेन ईशन माद्यंशंसः अपि वो रूद्रस्य हेतिर्वृणयुक्त
37. शतः ब्रा. 3/112/14 – ' गौर्वा इदं सर्व विशार्ति।
38. कौटिल्य–अर्थशास्त्रम् प्रकरण 45, अध्याय 29, पृ0 266
39. वही, पृ0 266
40. वही, पृ0 267
41. वही, पृ0 267
42. वही, पृ0 267
43. वही, पृ0 267
44. वही, पृ0 267
45. वही, पृ0 268
46. वही, पृ0 269
47. वही, पृ0 269
48. वही पृ0 271–72
49. कौटिल्य–अर्थशास्त्रम् प्रकरण 45, अध्याय 29, पृ0 270–71 'वर्षाष्रद्वेमन्तानुभयतः कालं दुहाः।
शिशिरावसन्तग्रहीमानेक कालम्। द्वितीयकाले दोग्धुरड्गष्ठच्छेदों दण्डः।
50. वही, 'एतेन नस्यदम्ययुगपिड्गनवर्तनकालां फलहांन दण्ड।
51. वहीं।
52. वहीं, पृ0 272
53. पृ0 272
54. यजु। 24/20–'वसन्ताय कपिंजलानालभते ग्रीष्मताय कलविडक्न वर्षाभ्यस्तित्तिरान्। शरदे वर्तिका हेमन्ताय ककराछिशिराय विककरान्
अथर्व 2/34/1 'य ईशे पशुपतिः पशूंना चतुष्ड्पदामुत या द्विपदाम् ।
55. निष्क्रीतः स यज्ञियं भागमतु रास्पोषा।'
56. कौटिल्य अर्थशास्त्रम् पु. 283
57. वहीं पृ0 283
58. वहीं पृ0 284
59. वहीं पृ0 284
60. वहीं पृ0 285
61. वहीं पृ0 285
62. कौटिल्य–अर्थशास्त्रम् प्रकरणम 48, अध्याय 32, पृ0 287
63. वहीं पृ0 288
64. वहीं पृ0
65. वहीं पृ0 289
66. वहीं पृ0 287
67. वहीं पृ0 288
68. वहीं पृ0 288
69. वहीं पृ0 290
70. वहीं पृ0 290
71. वहीं पृ0 290
72. वहीं पृ0 290।